दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणशुक्लपंचमी
फाल्गुण 10 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-122 | 1 | फरवरी 22, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 राष्ट्रिय-औषधि-शिक्षा अनुसन्धान-संस्थानेन च निजी-औषधि-कम्पनी इत्यनया सह सहयोगात्मक-अभिसन्धेः ज्ञापनं हस्ताक्षरितम्

3 प्रदेशसर्वकारेण 'रोड ड्रेनेज पॉलिसी' इति अनुमोदिता, दीर्घकालिक-रणनीत्या मार्गाः सुदृढाः भविष्यन्ति

5 मान्येन मुख्यमन्त्रिणा सह शिष्टाचारमेलनं विहितं कुलपतिना पाण्डेयवर्येण

## भारत-ब्राजील-देशौ अग्रिमेषु पञ्चवर्षेषु द्वैपाक्षिक-व्यापारसम्बन्धाः विंशति बिलियन् यू. एस. डालर-तः अधिकाः सम्वर्धयितुं सहमतौ अभवताम्



**हिमसंस्कृतवार्ताः** - नवदेहल्यां भारत-ब्राजील-देशौ डिजिटल-सहभागित्वम्, दुर्लभ-भू-रत्नानां सहकारः, एम. एस. एम. ई., तटीय क्षेत्रम् इत्यादीनां विभिन्नेषु क्षेत्रेषु सन्धेः आदानप्रदानं कृतवन्तौ। प्रधानमन्त्री नरेन्द्रमोदी, ब्राजील-देशस्य राष्ट्रपतिः लूयिज इनासियो लूला डा सिल्वा च राष्ट्रिय-राजधान्यां द्वैपाक्षिकं वार्तालापं कृतवन्तौ। उपवेशने, तौ द्वैपाक्षिकसम्बन्धानां सम्पूर्ण विस्तारं समीक्षितवन्तौ। उभयोः मध्ये बहुपक्षीय-मञ्चेषु सहकारः, बहुपक्षवादस्य परिष्कारः, वैश्विक-शासनं, वैश्विक दक्षिणसम्बद्धविषयाः इत्यादीनां परस्पर हितानां क्षेत्रीय-वैश्विक-विषयेषु अपि विचाराणाम् आदानप्रदानम् अभवत्। संयुक्त-वक्तव्ये प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् राष्ट्रपतेः लुला डा सिल्वा-वर्यस्य नेतृत्वे भारत-ब्राजील-देशयोः सम्बन्धः सुदृढः अभवत् । सः अवदत् यत् अग्रिमेषु पञ्चवर्षेषु द्वैपाक्षिकव्यापारसम्बन्धाः विंशति बिलियन यू. एस. डालर-तः अधिकाः भविष्यन्ति। ततः पूर्व राष्ट्रपतिः द्रौपदीमुर्मुः, प्रधानमन्त्री नरेन्द्रमोदी च राष्ट्रपतिभवनस्य प्राङ्गणे राष्ट्रपतेः लुला डा सिल्वा वर्यस्य औपचारिकं स्वागतं कृतवन्तौ । ब्राजील-देशस्य राष्ट्रपतिः राजघट्टे अपि गत्वा महात्मागान्धी-वर्यं श्रद्धाञ्जलिं समर्पितवान्।

## गोवा-समुद्रीय-सम्मेलनस्य पञ्चमं संस्करणम् गोवायां समाप्तम्। हिन्दमहासागरक्षेत्रे उद्भूतानां समुद्रीय समाह्वानान् परिहर्तुं चर्चाऽभवत्




**हिमसंस्कृतवार्ताः** - नौसेनाध्यक्षेण एडमिरल दिनेश के. त्रिपाठिना गोवा-समुद्रीय-सम्मेलनस्य पञ्चमं संस्करणम् उद्घाटयन् समुद्रीयसहयोगस्य महत्त्वं प्रतिपादितम्। प्रतिनिधि-समूहं सम्बोधयन् नौसेना प्रमुखः सद्यः एव विशाखापत्तनम् इत्यत्र अन्ताराष्ट्रिय-नौसेनायाः समीक्षार्थं चतुःसप्तति राष्ट्राणां समागमं तथा च मिलन् इत्यस्य नौकाश्रयस्य समुद्रस्य च समुद्रीयः महाकुम्भः इति वर्णितवान्। सः अवदत् यत् बृहदस्तरे सहभागिता वर्धमानं वैश्विकसमुद्रीय-सहभागित्वं प्रतिबिम्बयति।

## अमेरिकादेशस्य राष्ट्रपतेः डोनाल्ड ट्रम्प-वर्यस्य नूतन वैश्विक-शुल्कस्य घोषणायां सर्वोच्चन्यायालयस्य घोषणायाः अनन्तरं भारतस्य शुल्कं अस्थायीरूपेण दश प्रतिशतं यावत् न्यूनं भविष्यति।

**हिमसंस्कृतवार्ताः** - शुल्कस्य विषये अमेरिकादेशस्य सर्वोच्चन्यायालयस्य निर्णयस्य परिप्रेक्ष्ये, अमेरिकादेशस्य राष्ट्रपतिः डोणाल्ड ट्रम्पः अवदत् यत् भारतेन सह व्यापार-व्यवहारे किमपि परिवर्तितं नास्ति, तथा च भारतेन सह व्यवहारः प्रचलति इति अवधानं दत्तवान्। सः अवदत् यत् भारतेन सह तस्य सम्बन्धः अद्भुतः अस्ति, ते भारतेन सह व्यापारं कुर्वन्तः सन्ति। राष्ट्रपतिः ट्रम्पः गतरात्रौ वाईट-हाऊस-मध्ये वार्ताहर-सम्मेलने इदम् उक्तवान्, यदा अमेरिकादेशस्य सर्वोच्चन्यायालयेन तस्य व्यापक-शुल्कस्य निराकरणस्य निर्णयः कृतः। अमेरिकादेशस्य राष्ट्रपतेः डोनाल्ड् ट्रम्प्-वर्यस्य नूतन वैश्विक शुल्कस्य घोषणायाः अनन्तरं भारतस्य शुल्कं अस्थायीरूपेण दश प्रतिशतं यावत् न्यूनं भविष्यति इति वाईट हाऊस-अधिकारिणः स्पष्टीकृतवन्तः।

## आगामि मासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं देशात् नक्सलवादस्य उन्मूलनं भविष्यति - गृहमन्त्री अमितशाहः




**हिमसंस्कृतवार्ताः** - गृहमन्त्रिणा अमितशाहेन कामरूप-मेट्रो-मण्डलस्य कचुटोली-नगरे दशमम् असम-आरक्षि-बटालियन् इत्यस्य नूतनस्य परिसरस्य शिलान्यासं कृतम्। परियोजनायाः व्ययः प्रायः सार्द्ध-द्विशत-कोटिरूप्यकाणि अस्ति। अस्मिन् अवसरे जनसभां संबोधयन् केन्द्रीयः मन्त्री अवदत् यत्, राज्ये भाजपा-शासनस्य दशसु वर्षेषु विधि-व्यवस्थायाः स्थितिः सुदृढाऽभवत्, बृहती औद्योगिकसंस्थाः अधुना असम-राज्यं प्रति प्रवृत्ताः सन्ति। पूर्वं दिने केन्द्रीय गृहमन्त्री गुवाहाटी-नगरे सी.आर.पी.एफ. इत्यस्य सप्ताशीतितमे संस्थापनादिवसस्य पथसञ्चलने भागम् अभजत्। अस्मिन् अवसरे श्रीशाहः अवदत् यत् आगामि मासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं देशात् नक्सलवादस्य उन्मूलनं कर्तुं राष्ट्रम् प्रतिज्ञां कृतवान् अस्ति। सः अवदत् यत्, सी. आर्. पी. एफ्.-सैनिकाः, कोबरा-बटालियन इत्येतौ च देशं नक्सल-मुक्तं कर्तुम् अभूतपूर्वं कार्यं कुर्वन्तौ स्तः। सः अवदत् यत्, सप्तत्यधिक-द्विशतोत्तर-द्विसहस्रं यावत् वीरसैनिकाः देशस्य सेवायां स्वप्राणान् समर्पितवन्तः। सः अवदत् यत् अस्य बलस्य सप्तशतं यावत् कर्मचारिणः केवलं उत्तर-पूर्व-भारते एव स्वप्राणान् त्यक्तवन्तः। सः सी. आर्. पी. एफ्. सैनिकानां असाधारणस्य साहसस्य सम्मानं कृत्वा शौर्य-पदकं अपि प्रदत्तवान्। अस्मिन् अवसरे असम-राज्यस्य मुख्यमन्त्री हिमान्ता-विश्वासरमा अपि उपस्थितः आसीत्। श्रीशाहः पूर्वोत्तरक्षेत्रे जम्मू-काश्मीरे च शान्तिं स्थापयितुं सी. आर. पी. एफ. इत्यस्य भूमिकां अपि वर्णितवान्।

## सुभाषितम्

**उद्यमः साहसं धैर्यं,
बलं बुद्धिः पराक्रमः।
षडेते यस्य तिष्ठन्ति,
तस्य देवोऽपि शङ्कितः।।**

जिस व्यक्ति में उद्यमिता, साहस, धैर्य, बल, बुद्धि एवं पराक्रम, ये छः गुण होते हैं, उससे देवता भी शङ्कित (भयभीत) रहते हैं।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## इण्डिया-ए. आई. इम्पैक्ट



नवदेहल्याम् इण्डिया-ए. आई. इम्पैक्ट शिखरसम्मेलने भारतीय-युवकाङ्ग्रेस-दलस्य कतिपयैः कार्यकर्तृभिः कृतस्य विरोध-प्रदर्शनस्य विषये भाजपेति दलेन काङ्ग्रेस-दलस्य निन्दा कृता। नवदिल्ल्यां वार्ताहर सम्मेलनं सम्बोधयन् केन्द्रीयमन्त्री किरेनरिजिजु-वर्यः युव-काङ्ग्रेस-कार्यकर्तृणां कृत्यस्य निन्दाम् अकरोत् यत् एतत् राष्ट्रस्य विरुद्धं अपराधः अस्ति, एतत् दोषं नास्ति। सः आरोपितवान् यत् काङ्ग्रेस्-दलं भारतस्य समृद्धिं प्रगतिं च न सहितु शक्नोति ।

# राष्ट्रिय-औषधि-शिक्षा अनुसन्धान-संस्थानेन च निजी-औषधि-कम्पनी इत्यनया सह सहयोगात्मक-अभिसन्धेः ज्ञापनं हस्ताक्षरितम्



**हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः ।** राष्ट्रिय-औषधि-शिक्षा-अनुसन्धान-संस्थानेन (NIPER) नूतनदेहल्यां एकया निजी-औषधि-कम्पन्या सह सहयोगाय 'ज्ञापनम्' (MoU) हस्ताक्षरितम्। औषध-विभागस्य सचिवस्य श्रीमनोजजोशिनः गरिमामय्याम् उपस्थितौ एषा अभिसन्धिः सम्पन्ना । अस्मिन् अवसरे सचिवः मनोजजोशी अवदत् यत् अनुसन्धानतः आपणं (Market) यावत् प्रक्रियायां सुदृढीकरणाय शिक्षाजगतः उद्योगस्य च मध्ये सहयोगात्मक-अभिसन्धिः महती भूमिकां निर्वहति। सः बलम् अददात् यत् 'स्वदेशी-नवाचार-क्षमतानां' वर्धनाय, उद्यमितायाः प्रोत्साहनाय च ईदृशाः प्रयासाः अनिवार्याः सन्ति। अनेन सहयोगेन स्वास्थ्यसेवा-समाधानानि अल्पमूल्ये सर्वसुलभानि च भविष्यन्ति, येन जनसामान्यानां लाभः भविष्यति।
एषा 'आत्मनिर्भर-भारत' अभियानस्य दिशि एकं दृढं पदम् अस्ति। यतो हि यदा वैज्ञानिकाः शोधकर्तारः च उद्योगपतिभिः सह मिलित्वा कार्यं कुर्वन्ति, तदा नूतनानां औषधीनां विकासः तीव्रगत्या भवति। एतद् न केवलं भारतस्य अर्थव्यवस्थां सुदृढां करिष्यति, अपितु वैश्विकस्तरे औषधिक्षेत्रे भारतस्य नेतृत्वं च स्थापयिष्यति।

# इण्डिया-ए. आई. इम्पैक्ट शिखरसम्मेलनेन ए. ऐ. प्रभाव-विषये नवदेहली-घोषणाम् अङ्गीकृतम्

**हिमसंस्कृतवार्ताः** - ऐषमः षड्विंशत्यधिक द्विसहस्रतमवर्षस्य इण्डिया-ए. आई. इम्पैक्ट शिखरसम्मेलनेन ए. ऐ. प्रभाव-विषये नवदेहली-घोषणाम् अङ्गीकृतम्, यत् आर्टिफिसियल इन्टेलिजेन्स् इति वैश्विकसहयोगस्य महत्त्वपूर्णं सोपानम् अस्ति। आर्थिकवृद्धेः सामाजिक-कल्याणस्य च कृते ए. आई. इत्यस्य उपयोगस्य विषये विस्तृत-आधारित-वैश्विक सर्वसम्मतिं प्रतिबिम्बयन्, आहत्य अष्टाशीति देशैः अन्ताराष्ट्रिय-सङ्घटनैः च एषा घोषणा अनुमोदिता अस्ति। शिखरसम्मेलने सम्पूर्णस्य जगतः सहभागिता दृष्टा। 'सर्वजनहिताय, सर्वजनसुखाय' इत्यनेन सिद्धान्तेन ए. ऐ. इत्यस्य लाभाः मानवेषु समानरूपेण व्यापकरूपेण वितरणीयम्।



# भारतस्य तकनीकी-उपलब्धिः- प्रधानमन्त्रिणा 'इण्डिया चिप प्राइवेट लिमिटेड' इति संस्थायाः आधारशिला स्थापिता



प्रधानमन्त्री नरेन्द्रमोदी वर्चुअल्-माध्यमेन उत्तरप्रदेशस्य ग्रेटर नोएडा नगरे 'इण्डिया चिप प्राइवेट लिमिटेड' इत्यस्य आधारशिलां न्यस्तवान्। एषा विनिर्माण-इकाई जेवर-स्थिते यमुना-एक्सप्रेसवे औद्योगिक-विकास-प्राधिकरण-क्षेत्रे एचसीएल-फॉक्सकॉन इत्यनयोः संयुक्तं उपक्रमं वर्तते।दृश्य-श्रव्य-माध्यमेन (Video Conferencing) सभाम् सम्बोधयन् श्रीमोदी अवदत् यत् उत्तरप्रदेशे एतस्याः इक्यायाः स्थापना तकनीकी-आत्मनिर्भरतां प्रति एकं महत्त्वपूर्णं पदमस्ति। तेन उक्तं यत् भारतं सॉफ्टवेयर-हार्डवेयर-क्षेत्रयोः समानान्तररूपेण कार्यं कुर्वन् अस्ति, गर्वस्य विषयः अस्ति च यत् उत्तरप्रदेशः भारतस्य 'सेमीकंडक्टर' पारिस्थितिकी-तन्त्रस्य प्रमुखं केन्द्रं भविष्यति।प्रधानमन्त्रिणा घोषितं यत् एषा नवीना विनिर्माण-इकाई उत्तरप्रदेशाय तकनीकी-शक्तेः नूतनां परिचयं प्रदास्यति। सः अवदत् यत् एतत् दशकं भारतस्य 'टेक्नोलॉजी दशकम्' अस्ति, अस्मिन् समये कृतं कार्यं २१ तमे शताब्दे देशस्य दृढतायाः आधारः भविष्यति। भारतं चिप-निर्माण-क्षेत्रे आत्मनिर्भरं भूत्वा विकसितराष्ट्रं भवितुं वेगेन अग्रेसरं वर्तते।अस्मिन् अवसरे इलेक्ट्रॉनिक्स-सूचनाप्रौद्योगिकीमन्त्री अश्विनी वैष्णवः अवदत् यत् विगत ११ वर्षेषु प्रधानमन्त्रिणः नेतृत्वे भारतं इलेक्ट्रॉनिक्स-क्षेत्रे महाशक्तिरूपेण उद्भूतम्। वर्तमानकाले देशे १२ लक्षकोटिरूप्यकाणां इलेक्ट्रॉनिक्स-विनिर्माणं भवति। सः सूचितवान् यत् एषः प्लाण्टः प्रतिवर्षं ३ कोटि ६० लक्षं चिप्स उत्पादयिष्यति।'इण्डिया एआई इम्पैक्ट समिट २०२६' इत्यस्य उल्लेखं कुर्वन् श्री वैष्णवः अवदत् यत् अस्मिन् आयोजने ११८ देशानां संस्थानां च सहभागिता आसीत्, तथा च ८६ देशैः 'नई दिल्ली घोषणापत्रे' हस्ताक्षरं कृतम्। उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः अपि प्रधानमन्त्रिणः दूरदर्शिनः नेतृत्वस्य प्रशंसां कृतवान्।

# हिमाचलप्रदेश- विद्यालयशिक्षामण्डलम्: एलडीआर- परीक्षायाः शुल्कं न समर्पितवन्तोऽपि परीक्षां दातुं शक्नुवन्ति




**हिमसंस्कृतवार्ताः-धर्मशाला।**
हिमाचलप्रदेशीयविद्यालयशिक्षामण्डलेन २२ फरवरीदिने आयोज्यमानायाः सीमित-सीधाभर्ती (एलडीआर) परीक्षायाः कृते ये अभ्यर्थिनः मण्डलेन निर्धारितं शुल्कं न समर्पितवन्तः, तेऽपि परीक्षायां उपवेष्टुं शक्नुवन्ति। एतेषां परिणामः तावत् न प्रकाश्यते, यावत् ते शुल्कं न समर्पयन्ति। ज्ञायते यत् हिमाचलप्रदेशीयविद्यालयशिक्षामण्डलेन २३ दिसम्बरतः १५ जनवरीपर्यन्तं जालमाध्यमेन सीमित- साक्षात्भर्ती (एलडीआर) कृते आवेदनानि आमन्त्रितानि आसन्। १४२७ पदानां पूर्त्यर्थं आयोज्यमानायाः लिखितपरीक्षायाः कृते अभ्यर्थिभ्यः ३००० रूप्यकाणां शुल्कं समर्पयितुं उक्तम् आसीत्। एतानि पदानि केवलं हिमाचलप्रदेशस्य शिक्षाविभागे सेवारतानां एसएमसी- शिक्षकाणां कृते आरक्षितानि आसन्।
ये न्यूनतमं पञ्चवर्षपर्यन्तं सेवां सम्पन्नवन्तः, ये च १७-०७-२०१२ तिथौ प्रवर्तितायाः एसएमसी-नीतेः अधीनं नियुक्ताः आसन्, येषां समीचीन- आरएण्डपी-नियमानुसारम् आवश्यक- शैक्षणिक- योग्यता विद्यते, ते एव आवेदनार्थं पात्राः आसन्। अनन्तरं मण्डलस्य समीपे १५३४ आवेदनानि प्राप्तानि, किन्तु तेषु ९७ अभ्यर्थिनः शुल्कं न समर्पितवन्तः। अतः तानि आवेदनानि निरस्तानि इति उक्तम् आसीत्।अधुना मण्डलेन एतेभ्यः अभ्यर्थिभ्यः अनुग्रहः प्रदत्तः, ये २२ फरवरीदिने धर्मशाला, मण्डी, शिमला इत्यादिषु स्थानेषु आयोज्यमानायां परीक्षायाम् उपवेष्टुं शक्नुवन्ति। मण्डलस्य सचिवः डॉ. मेजर विशाल शर्मा अवदत् यत् शुल्कं न समर्पितवन्तोऽपि परीक्षां दातुं शक्नुवन्ति, किन्तु तेषां परिणामः शुल्कसमर्पणानन्तरमेव घोषितः भविष्यति।

# यूआईटी-बीटेक-विद्यार्थिनां २४ जनानां नियोजनप्राप्तिः

हिमाचलविश्वविद्यालयस्य विश्वविद्यालय- प्रौद्योगिकी-संस्थाने (यूआईटी) अधीयमानानां २४ बीटेक-विद्यार्थिनां देशस्य प्रसिद्ध-कम्पनीषु आकर्षक- वेतन- पैकेजेन सह नियोजनं प्राप्तम्। प्रसिद्धकम्पन्या इंफोसिसनाम्ना जेपी-विश्वविद्यालये वाकनाघाटे जून २०२५ तथा जनवरी २०२६ मासयोः द्विवारम् आयोजितेषु परिसर- साक्षात्कार-कार्यक्रमेषु भागं गृहीत्वा संस्थानस्य बीटेक- आईटी, सीएसई, ईसीई विभागयोः २२ विद्यार्थिनः वार्षिकं ३६ लक्षरूप्यकाणां वेतन-पैकेजेन चयनिताः।
अपरस्मिन् चरणे द्वौ विद्यार्थिनौ क्रमशः १० लक्षरूप्यकाणां वार्षिकवेतनेन सह १ लक्षरूप्यक- नियोजन- प्रोत्साहन-राश्या, तथा ६.५ लक्षरूप्यकाणां वार्षिकवेतनेन सह ७५,००० रूप्यक- नियोजन- प्रोत्साहन-राश्या चयनितौ।विश्वविद्यालय-प्रौद्योगिकी-संस्थानस्य (यूआईटी) निदेशकः प्रो. अमरजीत सिंह एतस्यां सिद्धौ हर्षं व्यक्तवान् तथा संस्थानस्य आईटी एवं सीएसई-विभागयोः नियोजन-अधिकारी सुनील कुमार, डॉ. राजेश चौहान तथा सर्वान् चयनित-विद्यार्थिनः अभिनन्दितवान्।

# प्रदेशसर्वकारेण 'रोड ड्रेनेज पॉलिसी' इति अनुमोदिता, दीर्घकालिक-रणनीत्या मार्गाः सुदृढाः भविष्यन्ति



**हिमसंस्कृतवार्ताः- शिमला।** पर्वतीय- भौगोलिक-परिस्थितीनां दृष्ट्या हिमाचलप्रदेशे मार्गाः 'जीवनरेखा' रूपेण कार्यं कुर्वन्ति। प्रदेशे मार्गाणां विस्तृतं जालं (Network) वर्तते। सुदूरग्रामेभ्यः मण्डलमुख्यालयपर्यन्तं मार्गाः आवागमन- व्यापार- पर्यटन- आवश्यकसेवानां कृते मुख्यभूमिकां निर्वहन्ति। मार्गजालस्य विस्तारः सुरक्षा च राज्यस्य आर्थिकप्रगतेः जनोत्थानस्य च आधारः अस्ति। एतदर्थं मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खु महोदयस्य मार्गदर्शने राज्यसर्वकारेण एका व्यापका 'रोड ड्रेनेज पॉलिसी' सज्जीकृता अस्ति। एषा नीतिः मार्ग-आधारभूत- संरचनायाः नूतनयुगस्य सूत्रपात्रं करिष्यति।

राज्यसर्वकारस्य प्रवक्त्रा सूचितं यत् एषा नीतिः वर्षाकाले प्रबलेन वृष्ट्या मार्गाणां हानिं न्यूनीकर्तुं प्रभावशालिनी भविष्यति। हिमाचलप्रदेशे 'लोकनिर्माणविभागः' (PWD) ४०,००० किलोमीटरतः अधिकस्य मार्गजालस्य संरक्षणं करोति। क्षेत्रीयनिरीक्षणेन मानसून-ऋतोः अनन्तरं कृतेन मूल्याङ्कनेन च ज्ञातं यत् अपर्याप्त- जल-निकासी- व्यवस्थया मार्गाणां महती हानिः भवति। राज्ये वर्षे २०२३ तथा २०२५ मध्ये मार्गाणां क्रमशः २४०० कोटिरूप्यकाणां तथा ३००० कोटिरूप्यकाणां क्षतिः अभवत्। तान्त्रिक- मूल्याङ्कनेन स्पष्टं जातं यत् अपर्याप्त-ड्रेनेज-तन्त्रं भूस्खलनं च अस्याः क्षतेः मुख्यकारणे स्तः। प्रतिवर्षं मार्गाणां जीर्णोद्धाराय सर्वकारस्य विशालं धनं व्ययीभवति।

**वैज्ञानिक-दृष्टिकोणं नूतन-प्रारूपं च**

अधुना यावत् लोकनिर्माणविभागेन पारम्परिक-क्षेत्रीय- आवश्यकतानुसारं जल-निकासी-व्यवस्था कृता आसीत्। नूतनायां नीत्यां वैज्ञानिक-हाइड्रोलॉजिकल (Hydrological) अथवा भू-आधारित-सिद्धान्ताः स्वीकृताः सन्ति।

दत्तांश-आधारित-योजनाः अधुना ड्रेनेज-संरचनाः वर्षायाः तीव्रतां, जलग्रहण-क्षेत्रस्य च विशेषताः दृष्ट्वा निर्मिताः भविष्यन्ति। सर्वासु नूतन- मार्ग-परियोजनासु 'बॉक्स कल्वर्ट' इति संरचनायाः प्रयोगः भविष्यति, यतः अस्याः यन्त्रैः स्वच्छता सुकरा भवति जलबाधायाः सम्भावना च न्यूना भवति।

## पर्वतीय-प्रवणता-संरक्षणं सुरक्षा च

नीत्यां पर्वतीय-प्रवणतायाः सुदृढीकरणे विशेषं बलं दत्तम् अस्ति। भूस्खलन-प्रवणक्षेत्रेषु निवारक-उपायाः अनिवार्याः कृताः।

जनसंख्या-क्षेत्रेषु व्यवस्थाः येषु मार्गेषु जनवसतिः अस्ति, तत्र नालिकाः मानकीकृत- डिजाइन-अनुसारं प्रच्छादिताः भविष्यन्ति।

मार्ग-सुरक्षां वर्धयितुम् उचित-अन्तराले रिफ्लेक्टर दीपाः अपि स्थापयिष्यन्ते, येन रात्रौ दृश्यता सुस्पष्टा भवेत्। एतेषां उपायानां लक्ष्यं केवलं जल- निकासी-परिष्कारः नास्ति, अपि तु मार्गाणां सुरक्षितं सुगमं च निर्माणम् अस्ति।

# Himachal Tourism: हिमाचले महिला-पर्यटकानाम् आतिथ्यं अधुना महिलाभिरेव क्रियते, "(She) शी-टूरिस्ट-नीतिः" निर्मीयते




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे महिला-पर्यटकानां सुरक्षासुविधानां च विचार्य राज्य-सर्वकारेण महिला-केन्द्रिता पर्यटननीतिः ("शी-टूरिस्ट-नीतिः") निर्माणाय उपक्रमः क्रियते। अस्याः नीत्याः उद्देश्यः एकाकिन्यः यात्रां कुर्वतीनां महिलानां कृते सुरक्षितं, विश्वसनीयम्, सुविधायुक्तं च वातावरणं प्रदातुम् अस्ति। अस्याम् अन्तर्गतं महिला- पर्यटकानां आतिथ्यं महिलाभिरेव क्रियते। पर्यटन-विभागेन शुक्रवासरे पर्यटन-व्यवसायिनः, होटल-प्रबन्धकाः, होम-स्टे-स्वामिनः तथा अन्ये हितधारकाः सह आभासीसभा आयोजिता, यस्यां विविधसूचनाः आमन्त्रिताः। सभायां प्रमुखपर्यटनस्थलेषु महिलापर्यटकानां कृते "एकस्थान- सहायताकक्षस्य" स्थापना प्रस्ताविता, यत्र सुरक्षा, मार्गदर्शनम्, आपत्कालीन-साहाय्यं च उपलब्धं भविष्यति। नीत्याः अन्तर्गतं विभागेन होम-स्टे-गृहाणां सत्यापनं क्रियते तथा महिला-मार्गदर्शिकानां महिला- वाहन- चालकानां च पृथक्-जालं विकसितं भविष्यति। अनेन महिला-पर्यटकानां सुरक्षितपरिवहनं प्रमाणित-निवाससुविधा च सुलभा भविष्यति। पर्यटनक्षेत्रे महिला- उद्यमिनीनां प्रोत्साहनार्थं विशेष-प्रोत्साहन-योजनाः अपि समावेश्यन्ते। गत-पञ्चवर्षेषु एकाकिन्यः यात्रां कुर्वतीनां महिलानां संख्या द्वादश-गुणाधिकं वर्धिता अस्ति। महिलाकेन्द्रिता पर्यटननीतिः निर्मितायां हिमाचलप्रदेशः स्वतन्त्रतया भ्रमणं कर्तुम् इच्छन्तीनां महिलानां प्रिय-गन्तव्यरूपेण प्रतिष्ठां प्राप्स्यति। अस्याः अन्तर्गतं होम-स्टे-गृहाणां आतिथ्यगृहानां च कृते कठोरसुरक्षानियमाः यथा सीसीटीवीयन्त्राणि, सुरक्षारक्षकाः, अनिवार्य- पुलिस-सत्यापनं च प्रवर्तिष्यन्ते। एकाकिन्यः यात्रिकाणां कृते विशेष-पैकेज-योजनायां योग- शिविराणि, साहसिक-पथनिर्माणं च प्रस्तावितम् अस्ति।

महिलाकेन्द्रिता पर्यटननीतेः मुख्योद्देश्यः सुरक्षितं विश्वसनीयं च वातावरणं प्रदातुम् अस्ति। सर्वासां सूचनानां विचारं कृत्वा व्यावहारिका प्रभावशाली च नीति निर्मीयते। अस्याः उपक्रमस्य फलस्वरूपेण प्रदेशस्य अर्थव्यवस्था सुदृढा भविष्यति तथा हिमाचलप्रदेशः सुरक्षित-पर्यटन-गन्तव्यरूपेण प्रतिष्ठापनं प्रक्रियायां सहायं प्राप्स्यति।

-विवेकभाटिया, पर्यटन-विभाग-निदेशकः

# जे. पी. नड्डा हिमाचले स्वदेशनिर्मितस्य 'टेटनेस' तथा 'टीडी' सूच्यौषधस्य शुभारम्भं कृतवान्




**हिमसंस्कृतवार्ताः- नवदेहली।** स्वास्थ्य एवं परिवारकल्याणमन्त्री जगतप्रकाशनड्डा महोदयः स्वदेशी- टेटनेस- वयस्क- डिप्थीरिया (टीडी) सूच्यौषधस्य (Vaccine) आरम्भं कुर्वन् एतद् स्वास्थ्य-अवसंरचना-क्षेत्रे 'मीलस्तम्भः' इति वर्णितवान्। सः अवदत् यत् एतत् स्वदेशी- सूच्यौषधं स्वास्थ्यक्षेत्रे आत्मनिर्भरतां प्रति सर्वकारस्य प्रतिबद्धतां दर्शयति। नड्डा महोदयः शनिवासरे हिमाचलप्रदेशस्य कसौली-स्थिते 'केन्द्रीय अनुसन्धान संस्थाने' (CRI) निर्मितस्य टेटनेस- टीडी- सूच्यौषधयोः शुभारम्भं कुर्वन् सीआरआई- संस्थानस्य वैज्ञानिकान्, तान्त्रिकविशेषज्ञान्, कर्मचारिणः च अभिनन्दितवान्। सः एतं शुभारम्भं राष्ट्रिय- स्वास्थ्य- सुरक्षायाः तथा सार्वजनिक- स्वास्थ्य- आधारभूत- संरचनायाः सुदृढीकरणस्य दिशि एकं महत्वपूर्णं सोपानं वर्णितवान्। केन्द्रीयमन्त्रिणा उक्तं यत् स्वदेशे निर्मितस्य टीडी-सूच्यौषधस्य शुभारम्भः 'आत्मनिर्भरभारतस्य' संकल्पनायाः दिशि दृढं पदम् अस्ति। एतस्य औपचारिक-शुभारम्भेण सह अधुना एतत् 'सार्वभौमिक- टीकाकरण- कार्यक्रमे' (UIP) आपूर्त्यै प्रस्थापितम् अस्ति। सः सूचितवान् यत् केन्द्रीय-अनुसन्धान-संस्थानम् अप्रैल-मासं यावत् ५५ लक्षं (5.5 million) मात्राः (Doses) उपलब्धाः करिष्यति, उत्पादनं च क्रमेण वर्धयिष्यति।

## 'विश्वस्य औषधालयः' इति भारतस्य गौरवम्

नड्डा महोदयः अवदत् यत् भारतं विश्वे 'विश्वस्य औषधालयः' (Pharmacy of the world) इति रूपेण विख्यातं वर्तते तथा च भारतं विश्वस्य प्रमुखेषु सूच्यौषध-निर्मातृषु अन्यतमम् अस्ति। सः उक्तवान् यत् पूर्वं टेटनेस- तपेदिक- मस्तिष्कज्वरादीनां (Encephalitis) सूच्यौषधानां विकासे दशकाः व्यतीताः भवन्ति स्म, परन्तु कोविड-१९ विभीषिकाकाले भारतेन केवलं नवसु मासेषु एव स्वदेशी-सूच्यौषधद्वयं विकसितं तथा च २२० कोटि-तः अधिकाः मात्राः (Doses) दत्ताः।

## वैश्विक-एकता तथा आयुष्मान-भारत-योजना

'वैक्सीन-मैत्री' इति प्रारम्भस्य उल्लेखं कुर्वन् सः अवदत् यत् भारतेन प्रायः १०० देशेभ्यः सूच्यौषधानि प्रदत्तानि, येषु ४८ देशेभ्यः निःशुल्कं लब्धानि। सः 'आयुष्मान भारत' (PM-JAY) योजनायाः अपि चर्चां कृतवान्, या विश्वस्य बृहत्तमा स्वास्थ्य-बीमा-योजना अस्ति। सः सूचितवान् यत् ७० वर्षात् अधिकवयस्काः सर्वे नागरिकाः प्रतिवर्षं ५ लक्षरूप्यकाणां स्वास्थ्य-वीमायाः पात्राः भविष्यन्ति।

## वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीरजः, हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य मया बेङ्गलूरु-नगरे एकः विचित्रः विषयः श्रुतः। गणिते महापण्डितेन जीविकायै 'रैपिडो' इति द्विचक्रिका-यानं चालितम्।

**नन्दिनी-** एतत् तु खेदकरं वचः। उच्चशिक्षितेन अपि कष्टं सोढम्। किन्तु हैदराबाद-नगरे अन्यत् धाष्टर्यं वीक्षितम्। तत्र एकेन वितरण-कर्मचारेण सुरक्षां विना चक्र-पादुकाः धृताः।

**काव्या-** तत् तु भयावहम्। तेन शिरस्त्राणं न धृतम्। अपरत्र, आनन्द महिन्द्रेण एकः विज्ञान- शिक्षकः श्लाघितः। तेन शिक्षकेन एकेन एव श्वासेन बृहन् स्यूतः पूरितः।

**नन्दिनी-** अहो बुद्धिकौशलम्! वायुनिपीडन-नियमः तेन प्रदर्शितः। इदानीं हिम-क्रीडासु अपि विचित्रं श्रुतम्। 'स्की-मो' इति स्पर्धायां फलक-धावकैः पर्वतः आरूढः।

**काव्या-** एषा क्रीडा तु कठिनतमा प्रतीयते। श्रान्तिः तैः अनुभूता। अस्तु, अद्यतन-वार्ताः समाप्ताः। पुनर्मेलिष्यावः।

# विलीनानां विद्यालयानां मध्ये एकः 'सीबीएसई' अपरश्च 'हिमाचलबोर्ड' इत्यनेन सम्बद्धः भविष्यति- शिक्षामंत्री



हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।येषु स्थानेषु कन्या-बाल-विद्यालयाः पृथक्- पृथक् सन्ति, तान् अधुना प्रदेशसर्वकारः 'सीबीएसई-बोर्ड' (CBSE Board) इत्यस्य अधीनं आनेतुं प्रयतते। एते विद्यालयाः सर्वप्रथमं 'सह-शिक्षा' परिधौ आनेष्यन्ते। अस्मिन् विषये शिक्षाविभागेन निर्देशाः अपि निर्गताः। मण्डीनगरे अपि कन्या- बालक-विद्यालयान् एकीकृत्य 'सहशिक्षा' विद्यालयः निर्मीयते। एतयोः एकः विद्यालयः सीबीएसई- मण्डलस्य, अपरश्च हिमाचल- शिक्षा- मण्डलस्य अधीनं स्थास्यति। शिक्षामन्त्री रोहितठाकुरः मण्डीनगरे संवादकैः सह अनौपचारिकायां वार्तायां एतां सूचनां दत्तवान्। सः अवदत् यत् सर्वकारस्य उद्देशः अस्ति यत् एकः विद्यालयः सीबीएसई- अधीनः भवेत् द्वितीयश्च हिमाचल- बोर्ड- अधीनः, येन छात्राः स्वेच्छानुसारं सौकर्यानुसारं च स्वमण्डलस्य चयनं कर्तुं शक्नुवन्ति।

### त्रिषु वर्षेषु सर्वकारेण १३०० प्राथमिक-विद्यालयाः विलयिताः

शिक्षामन्त्री रोहित ठाकुरः सूचितवान् यत् गतेषु त्रिषु वर्षेषु प्रदेशसर्वकारेण १३०० प्राथमिक- विद्यालयाः विलयिताः। एतत् तस्मात् कारणात् कृतं यतः बहुषु विद्यालयेषु छात्राः एव नासन्, येषु च न्यूनच्छात्राः आसन् ते अन्यान् विद्यालयान् प्रति विलयिताः। एषा प्रक्रिया केन्द्रसर्वकारेणापि अनुस्रियते। अधुना यावत् सम्पूर्णदेशे ९० सहस्रं विद्यालयाः विलयिताः सन्ति। सः अवदत् यत् गतेषु २०-२२ वर्षेषु राजकीयविद्यालयेषु प्रवेश- सङ्ख्यायां (Enrollment) महती न्यूनता आगता। यद्यपि जन्मदरस्य न्यूनता अपि अस्य मुख्यं कारणम् अस्ति। अङ्क-विवरणानुसारं २० वर्षाणि पूर्वं प्रथमतः अष्टमी-कक्षापर्यन्तं ९.७१ लक्षं प्रवेशाः भवन्ति स्म, यदा तु अद्य एषा सङ्ख्या न्यूनीभूय ४.२ लक्षं जाता अस्ति।

# पश्चिमबङ्गालराज्ये जनपद-सत्र-न्यायालयतः सार्ध-शतं (१५०) न्यायाधीशानां नियुक्तिं कर्तुं निर्णयः



पश्चिमबङ्गालराज्ये 'विशेष-गहन-पुनरीक्षण-एसआईआर' (SIR) प्रक्रियायां साहाय्यार्थं न्यायिक-अधिकारिणां नियुक्तये सर्वोच्चन्यायालयस्य ह्यस्तन-निर्देशस्य अनुपालने जनपद-सत्र-न्यायालयतः सार्ध-शतं (१५०) न्यायाधीशानां नियुक्तिं कर्तुं निर्णयः स्वीकृतः। निर्वाचन-आयोगस्य सूत्रैः ज्ञापितं यत् सत्र-न्यायाधीशैः सह कलकत्ता-उच्चन्यायालयस्य सप्त पूर्व-न्यायाधीशाः अपि एतदर्थं चिह्निताः सन्ति। इयं सम्पूर्णप्रक्रिया सर्वोच्चन्यायालयस्य मार्गदर्शिकानाम् अनुरूपमेव अग्रे सरिष्यति।सत्र-न्यायाधीशाः सम्बद्ध-समितीनाम् अपि भागाः भविष्यन्ति। 'एसआईआर' प्रक्रियायां न्यायिक-अधिकारिणां नियुक्ति-सम्बद्धस्य सर्वोच्चन्यायालयस्य आदेशस्य अनुपालने अद्य उच्चन्यायालयस्य मुख्यन्यायाधीशः, राज्यस्य मुख्यसचिवः, मुख्य-निर्वाचन-अधिकारी, राज्यस्य महाधिवक्ता, अतिरिक्त-सॉलिसिटर-जनरल तथा च अन्ये वरिष्ठाः अधिकारिणः उपवेशने (बैठक) सम्मिलितवन्तः।

उपवेशनानन्तरं मुख्य-निर्वाचन-अधिकारी मनोज कुमार अग्रवालः पुनरुक्तवान् यत् आयोगस्य मुख्योद्देश्यं सर्वेषां पात्राणां मतदातामां मतदातासूच्यां सम्मीलनं सुनिश्चितं करणीयमस्ति। तेन एतदपि ज्ञापितं यत् प्रमाणीकरणस्य सूचना-निस्तारणस्य च प्रक्रिया अद्य मध्यरात्रिं यावत् प्रचरिष्यति। न्यायालयस्य निर्देशानुसारं अन्तिम-निस्तारण-प्रक्रिया न्यायिक-अधिकारिणां माध्यमेन एव सम्पन्ना भविष्यति। निर्वाचन-क्षेत्राणाम् आधारेण श्रवणं (सुनवाई) अधिकं सुविधायुक्तं भविष्यति इति आयोगेन मतं प्रकटितम्, तथापि अन्तिमनिर्णयः न्यायालयस्यैव भविष्यति।

# लोकनिर्माणमन्त्री विक्रमादित्यसिंहः केन्द्रीय- ग्रामीण- विकासमन्त्री शिवराजसिंहचौहानं समागच्छत्। पीएमजीएसवाई-अग्रिमचरणे १२०० किलोमीटर-परिमिता नवीना मार्गाः निर्मीयन्ते



हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशस्य लोकनिर्माणमन्त्री विक्रमादित्यसिंहः शनिवासरे नूतनदिल्ली-नगर्यां केन्द्रीय-ग्रामीणविकासमन्त्रीणं शिवराजसिंहचौहानं समागत्य प्रधानमन्त्री- ग्राम- सड़क- योजना (पीएमजीएसवाई) चतुर्थ-चरणस्य अन्तर्गतं स्वीकृतानां मार्गपरियोजनानां, प्रचलितकार्याणां विस्तृतां प्रगति-प्रतिवेदनं प्रस्तुतवान्।सभायां शिमलाजनपदस्य अति-दुर्गम-उच्चप्रदेशे स्थितस्य डोडरा-क्वार-क्षेत्रस्य मार्ग-परियोजनानां विषयः मुख्यतया उद्भावितः। अवगतं कृतं यत् पीएमजीएसवाई- प्रथमचरणस्य अन्तर्गतं स्वीकृतस्य डोडरा-क्वार- क्षेत्रीय-मार्गस्य किञ्चित् अंशः कठिन- भौगोलिक- स्थितीनां, दुर्गम- भूमितलस्य, प्रतिकूल-जलवायोः तथा सीमित- कार्यकालस्य कारणात् अद्यापि अपूर्णः अस्ति। अयं मार्गः स्थानीय-ग्रामीण-जनानां, सीमावर्तीप्रदेशानां आपद्-व्यवस्थापनस्य, आरोग्य-आपत्कालीन- सेवानाम्, आवश्यक-वस्तूनां च पूर्तेः दृष्ट्या अत्यन्तं संवेदनशीलः अस्ति। अस्मिन् सन्दर्भे विक्रमादित्यसिंहः प्रार्थितवान् यत् डोडरा-क्वार-प्रदेशस्य शेष-मार्ग-पुटकानां तथा प्रथमचरणस्य अवशिष्टकार्याणां कृते विशेष-अपकर्षः, अतिरिक्त-वित्तीय-सहायता तथा तकनीकी-साहाय्यं प्रदीयताम्, येन अस्य भौगोलिक-चुनौतिपूर्ण-प्रदेशस्य जनाः शीघ्रं सर्व-ऋतु- मार्गसुविधां प्राप्नुयुः।सभायाम् एतदपि अवगतं कृतम् यत् हिमाचलप्रदेशाय पीएमजीएसवाई-चतुर्थ-चरणस्य अन्तर्गतं प्रायः १५०० किलोमीटर-दीर्घतायाः ग्रामीण- मार्ग- परियोजनाः स्वीकृताः सन्ति, येषां अनुमानित-व्ययः प्रायः २३०० कोटि-रूप्यकाणि अस्ति। अपरं च, प्रदेशसर्वकारेण पीएमजीएसवाई- चतुर्थ-चरणस्य द्वितीय-उपचरणे प्रायः १२०० किलोमीटर-अधिकमार्गाणां प्रस्तावः केन्द्र- सर्वकारस्य पुरतः स्थापितः अस्ति। तेषां कृते लोकनिर्माण-विभागेन विस्तृत- परियोजना- प्रतिवेदनानि (डीपीआर) सज्जीकृतानि भवन्ति तथा समीपे भविष्यात् तेषां स्वीकृतिः अपेक्ष्यते।

## जनैः गिफ्ट-डीड-पत्राणि प्रदातुम् अनुरोधः

केन्द्रीय-ग्रामीणविकासमन्त्री शिवराजसिंहचौहानः हिमाचलप्रदेशस्य आवश्यकतानां प्रति पूर्ण- संवेदनशीलतां व्यक्तीकृत्य आश्वासनं दत्तवान् यत् डोडरा-क्वार-प्रदेशस्य शेष-पुटकानां, पीएमजीएसवाई- प्रथम-चरणस्य अवशिष्टकार्याणाम्, आवश्यक-वित्तीय- अनुमोदनानां विषयः वित्त-मन्त्रालय-सहित सम्बन्धितस्तरेषु प्राथमिकतया उत्थाप्यते तथा शीघ्रं सकारात्मक-फलानि प्राप्यन्ते।

प्रदेश-सर्वकारेण पुनरुक्तं यत् केन्द्र-राज्ययोः समन्वित-प्रयत्नैः हिमाचलप्रदेशस्य ग्रामीण- प्रदेशेषु दृढं, सुरक्षितं, गुणवत्तायुक्तं च मार्ग-जालं विकसितुं तस्याः सर्वोच्च-प्राथमिकता अस्ति। एतत् केवलं मार्ग-निर्माणं न, अपि तु सम- अवसर- प्रदानस्य, ग्रामीणसमृद्धेः तथा आत्मनिर्भर- हिमाचलस्य दिशि एकः सशक्तः संकल्पः अस्ति।

विक्रमादित्यसिंहः सर्वान् जनप्रतिनिधीन्, पंचायत- प्रतिनिधीन् तथा भूमिस्वामिनः अपि आह्वयत् यत् ते अधिकाधिक-संख्यया गिफ्ट-डीड-पत्राणि प्रदद्युः, येन मार्ग-निर्माणार्थं आवश्यक-भूमिः समये उपलब्धा भवेत् तथा राज्यस्य अधिकाधिक- वञ्चित- बस्तयः मार्ग-जालेन संयोजिताः स्युः। स उक्तवान् यत् भवतां सक्रिय-सहयोगः एव दूरस्थ-वञ्चित-प्रदेशेषु विकासस्य प्रकाशं प्रसारयितुं महान् आधारः भविष्यति।

# मान्येन मुख्यमन्त्रिणा सह शिष्टाचारमेलनं विहितं कुलपतिना पाण्डेयवर्येण



**हिमसंस्कृतवार्ताः- हरिद्वारम्।** उत्तराखण्डसंस्कृतविश्वविद्यालयस्य हरिद्वारस्थितस्य माननीयः कुलपतिः प्रो रमाकान्तपाण्डेयः देहरादूनस्थिते मुख्यमन्त्रिनिवासे माननीयेन मुख्यमन्त्रिणा पुष्करसिंहधामिना सह शिष्टाचारमेलनम् अकरोत्। कुलपतिदायित्व- ग्रहणानन्तरम् एषस्तदीयः प्रथमः सम्वादः आसीत्, यस्मिन् सः संस्कृतशिक्षासम्बद्धेषु गम्भीरविषयेषु मुख्यमन्त्रिणा सह सविस्तरं चर्चाम् अकरोत्। कुलपतिः प्रो रमाकान्तपाण्डेयः विश्वविद्यालयस्य विकाससम्बन्धे स्वमन्तव्यम् मुख्यमन्त्रिणे निवेदितवान् अथ च तदीयेन मार्गदर्शनेन विश्वविद्यालयम् अधिकोच्चशिखराणि नेतुम् अन्वरुन्द्ध। सः विश्वविद्यालयस्य वर्तमानस्थितेः, भावियोजनानामथ च आवश्यकसंसाधनानां विषये अपि मुख्यमन्त्रिणे असूचयत्। अस्मिन् अवसरे माननीयः मुख्यमन्त्री पुष्करसिंहधामीवर्य उक्तवान् यत् संस्कृतशिक्षायां बह्व्यः संभावनाः सन्ति तथा उत्तराखण्डं संस्कृतप्रदेशरूपेण स्थापयितुं तस्य सर्वकारः वचनबद्धा अस्ति। सः उक्तवान्, "अस्माकं सर्वकारस्य प्राथमिकतासु संस्कृतशिक्षायाः देशव्यापिनी विशेषण परिचयस्य निर्माणस्य संकल्पः अस्ति।" मुख्यमन्त्री पुनः अपि उक्तवान् यत् संस्कृते नवाचारवृद्धिः आवश्यकाऽस्ति, यथा एषा प्राचीनभाषा आधुनिककाले अपि प्रासंगिका भवेत्। अस्मिन् अवसरे कुलपतिः प्रो रमाकान्तपाण्डेयः विश्वविद्यालयेन प्रकाशितं पञ्चाङ्गं दैनन्दिनीं च मुख्यमन्त्रिणे समर्पितवान्। मुख्यमन्त्री तम् आश्वासितवान् यत् राज्यसर्वकारः विश्वविद्यालयस्य विकासाय सर्वसम्भवं सहयोगं प्रदास्यति।

# परिवर्तनयोगेशसंस्थानस्य षट्त्रिंशत्तमा सुदर्शनसभा सम्पन्ना
## श्रीश्री१००८ निरंकारानन्दमहाभागेन अध्यक्षता कृता





**हिमसंस्कृतवार्ताः— नवदिल्ल्यां, २० फरवरी २०२६**
राजधानी नवदिल्ल्यां परिवर्तनयोगेशसंस्थानस्य महर्षिसत्यसनातनाखाडेन सह संयुक्ततत्त्वावधानेन आयोजिता षट्त्रिंशत्तमा सुदर्शनसभा आध्यात्मिकचेतनायाः राष्ट्रभक्तेः च दिव्यः संगमः भूत्वा सम्यक् सम्पन्ना। उक्तायां सभायां, या १९ फरवरी दिने समायोजिता आसीत्, देशस्य नानाप्रदेशेभ्यः आगताः साधुसन्ताः, विद्वांसः, समाजसेवकाः च समागत्य राष्ट्रधर्मसंस्कृतेः पुनरुत्थानाय दृढसंकल्पं कृतवन्तः।

### अध्यक्षता तथा मान्यवराणां सान्निध्यम्

अस्याः सभायाः अध्यक्षता प.पू.स. ॐ ब्रह्मचैतन्यउदयनाथमहाभागेन (पीठाधीश्वरः, श्रीक्षेत्रमुक्तिपीठ) तथा श्रीश्री१००८ निरंकारानन्दमहाभागेन (पीठाधीश्वरः, महर्षिसत्यसनातनाखाडः) कृता।
मुख्यातिथयः आसन् आचार्यमहन्तः डॉ. विवेकगुरु, आत्मानन्दमहाभागः (तारणपन्थः), डॉ. हरीशमिश्रः च। काशीहिन्दीविद्यापीठस्य कुलपतिः डॉ. संभाजीराजारामबाविस्करः, उपकुलपतिः डॉ. योगेशतरेहनः च अपि उपस्थितौ आस्ताम्।

### सम्मानवितरणम्

अस्मिन् शुभावसरे समाजशिक्षाक्षेत्रयोः विशिष्टसेवां कृतवन्तः जनाः सप्तभिः प्रमुखसम्मानैः अलंकृताः—
सहजछीपः — छत्रपतिशिवाजीबालवीरपुरस्कारः
उदयनाथमहाभागः — परमगुरुपदसम्मानः
आत्मानन्दमहाभागः — अन्तर्राष्ट्रीयसन्तोपाधिसम्मानः
निरंकारानन्दमहाभागः — तक्षशिलाविद्वत्सम्मानः
डॉ. हरीशमिश्रः — सनातनगौरवसम्मानः
हीरासिंहधनिकः — हिन्दूराष्ट्ररत्नसम्मानः
आचार्यडॉ. देवकुमारपाण्डेयः — ज्योतिषरत्नम्
तदतिरिक्तं अष्टौ विद्वांसः विद्यासागर उपाध्या, सप्तविंशतिः विद्वांसः विद्यावाचस्पति उपाध्या च सम्मानिताः।

**ग्रन्थलोकार्पणम् एवं बौद्धिकविमर्शः**
अस्मिन् कार्यक्रमे द्वयोः ग्रन्थयोः लोकार्पणं सम्पन्नम्—
"अग्निः भव" — लेखिका डॉ. भावना शर्मा
"विरहः" — लेखकः डॉ. प्रशान्त शर्मा
डॉ. राकेशकुमारार्यस्य ओजस्वि भाषणं जनसमूहं राष्ट्रधर्मनिष्ठया प्रेरितवान्। वक्तारः भारतीयसंस्कृतेः सनातनपरम्पराणां संरक्षणसंवर्धने विशेषं बलं दत्तवन्तः।

### समितेः योगदानम्

अस्य आयोजनस्य सफलतायां संजयशर्मा, राजेशकुमारसौखिया, आनन्दजिन्दल, राकेशकुमार, डॉ. टीकमसिंह, सुनीलदुग्गलः इत्यादीनां विशेषयोगदानम् आसीत्।अन्ते संस्थापकः डॉ. योगेशतरेहनः सर्वेषां प्रति कृतज्ञतां व्यक्तवान्।



डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्

# "बोधकथा"

एकः नृपः आसीत्। सः नृपः प्रभावशाली, बुद्धिमान्, धनसम्पन्न च आसीत् | परितः राज्ञः अपि तस्य परामर्शं स्वीकुवन्ति/ तेन सह परामर्शं कुर्वन्ति। एकदा सः शयने शयितः सन् चिन्तयन् आसन्। कियत् बृहत मम परिवारः, कियत् समृद्धः मम अन्तःपुरः, मम सेना बलवती चास्ति, बृहती सम्पन्न मम राजकोषः। मम कोषः कुबेरम् अपि लज्जां करोति। राजनिवासस्य वैभवं दृष्ट्वा अप्सरसः अपि ईर्ष्याम् अनुभवन्ति। मम प्रत्येक वचनम् आदेशम् अस्ति। सः राजा कविहृदयः, संस्कृत विद्वान चास्ति। राजा स्वस्य आन्तरिक भावना शब्देषु स्थापयितुम् आरब्धवान्। काव्यस्य तिस्र पङ्क्ती उत्तमा सञ्जाता किन्तु चतुर्थी पङ्क्ति न सञ्जाता। सः स्वस्य तिस्र पङ्क्त्या वारंवारं गुञ्जति स्म। ''चेतोहरा युवतयः स्वजनाऽनुकूलाः सद्बान्धवाः। प्रणयगर्भगिरश्च भृत्याः गर्जन्ति दन्तिनिवहास्त्विरलास्तुरंगाः। सतत गुञ्जयित्वाऽपि चतुर्थी पङ्क्ति न सिद्धा भवति। संयोगबशात् एकः चोरः राजप्रसादे चौर्य कर्तुम् आगत् आसीत्। राज्ञः शयनकक्षे चोरः कूटाक्रमणेन आगतः। तल्पस्य अधः चोरः उपविष्टः, सोऽपि संस्कृतभाषायाः ज्ञानी आसीत्। विज्ञः, आशुकवि च आसीत्। समस्यापुर्त्या सः उत्तम ज्ञाताऽसित् | राज्ञा गुञ्जयितं श्लोकं तेन श्रुतः। चतुर्थी पङ्क्ति अपूर्णा इति सः ज्ञातवान् चौरस्य कविमनः जागृतं, सः विस्मृतवान् यद सः चौरः अस्ति तथा च चौर्यार्थं तत्र आगतः। चोरः शीघ्रं चतुर्थी पङ्क्तीम् उक्तवान्- "सम्मीलने नयनोर्नहि किञ्चिदस्ति।"
राज्यं, धनं, कनकं, सुन्दर्यः यावत पर्यन्त अस्ति तावतपर्यन्त नेत्राणि उद्घाटितानि सन्ति| नेत्रौ यदा पिहितौ तदा किमपि नास्ति। किमर्थम् अङ्हकारम् अस्ति? वृथा अभिमान मास्तु। चोरस्य पङ्क्त्या राज्ञः नयनौन्मिलितम्। सः ज्ञानं प्राप्तम्। राजा उच्चै अवदत्- यः कोपि तल्पस्य अधः गोपितम् अस्ति, सः शीघ्रं बर्हिआगच्छतु इति। चोरः राज्ञः पुरतः बद्धाञ्जलिम् उपस्थितः। चोरः अवदत्- अहं चौर्यं कर्तुं आगतवान् किन्तु भवतः काव्यं श्रुत्वा ममापि काव्यप्रेम जागृतम्, अहमपि चतुर्थपङ्क्तिं योजयित्वा काव्यपूर्तिं कृतवान्। अहम् अपराधी अस्मि तर्हि कृपया मां क्षमस्व।
राजा अवदन्- अस्मिन् क्षणे भवान मम गुरुः अस्ति, जीवने त्वं किमपि कार्यं कृतं किन्तु इदानीं त्वमेव जीवनस्य परिचयं कारितवान्। सत्यस्य साक्षात्कारं कृतवान् च। त्वं यत्किमपि इच्छसि तद् अभियाचयतु। नेत्रे पिहितनन्तरं किमपि अवशिष्टं नास्ति। अद्य मम ज्ञाननेत्राणि उद्घाटितानि आसन्। अहं संन्यासग्रहणं करोमि तर्हि शीघ्रातिशीघ्रं यद् इच्छसि तद् अभियाचतु। चौरः तूष्णीं स्थित्वा किं करवाणि इति सः न ज्ञातम्। राजा अग्रे अवदन्- यदि त्वं मम सम्पूर्ण राज्यं इच्छसि तर्हि अहं तदपि दास्यामि।
चौरेण उक्तं ममापि मनपरिवर्तनं जातम्। अहम् अपि संन्यासं स्वीकृत्वा अटनार्थं गच्छामि च। राजा तथा चोरः द्वयोपि संन्यासं ग्रहित्वा तत्रतः निर्गमतः।
केवलम् एकया पङ्क्त्या द्वयोरपि जीवनपरिवर्तनं जातम्। आत्मसाक्षात्कारः द्वयोरपि अभवत्।